# कुसुमाकरशोभित

## रागम्: कुसुमाकरम्    ताळम्: रूपकम्

### श्री मुत्तुस्वामि दीक्षित विरचिता

पल्लवि

कुसुमाकरशोभितश्रीपुरगेहं
कुम्भजगुरुगुहनतं भावयेऽहम्

समष्टिचरणम्

हसनजितत्रिपुरमवनतमुरहरं
अब्जशेखरं करुणाकरं हरम्

मध्यमकाल साहित्यम्

भसितोद्धूळितभरणं पन्नगवलयाभरणं
असमास्त्रगर्वहरणं अगराजसुतारमणम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇